International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(2): 173-176
© 2024 IJSR
www.anantaajournal.com
Received: 15-01-2024
Accepted: 19-02-2024

**डॉ. गोपीकृष्णन् रघुः**
सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्था, बेलूरमठः, हौरा, पश्चिमबङ्गः, भारत

**Corresponding Author:**
**डॉ. गोपीकृष्णन् रघुः**
सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्था, बेलूरमठः, हौरा, पश्चिमबङ्गः, भारत

# प्रथमानिर्दिष्टं समास उपसर्जनम्

**डॉ. गोपीकृष्णन् रघुः**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i2c.2351

**सारांश**

समासः पञ्चवृत्तिषु अन्यतमः बृहत्तमश्च। तस्य प्रक्रिया व्याकरणशास्त्रे महत्वपूर्णं स्थानमावहति। तस्यां प्रक्रियायां मुख्यासु संज्ञासु अन्यतमा वर्तत् उपसर्जनसंज्ञा। अस्याः संज्ञाया विधायकं सूत्रद्वयं विद्यते – "प्रथमानिर्दिष्टं समास उपसर्जनम्"(१/२/४३) इति एकं "एकविभक्ति चापूर्वनिपाते" (१/२/४४) इति चापरं सूत्रम्। संज्ञा एका एव परन्तु सूत्रभेदेन फलभेदो दृश्यते। प्रथमसूत्रेण विधीयमानायाः उपसर्जनसंज्ञायाः फलं पूर्वनिपातः, द्वितीयसूत्रेण च विधीयमानायाः फलं ह्रस्वविधानम्। प्रथमम् उपसर्जनं लौकिकं शास्त्रीयम् इत्युभयरूपम्। अतः तद्विषये विविधप्रश्नामां समाधानपुरस्सरम् अत्र पत्रे विचारः प्रस्तूयते।

**कूटशब्दः** समासः, उपसर्जनम्, संज्ञा, अन्वर्थसंज्ञा, प्रथमानिर्दिष्टम्, सूत्रम्

## प्रस्तावना

समासः पञ्चवृत्तिषु अन्यतमः बृहत्तमश्च। तस्य प्रक्रिया व्याकरणशास्त्रे महत्वपूर्णं स्थानमावहति। तस्यां प्रक्रियायां मुख्यासु संज्ञासु अन्यतमा वर्तत् उपसर्जनसंज्ञा। अस्याः संज्ञाया विधायकं सूत्रद्वयं विद्यते – "प्रथमानिर्दिष्टं समास उपसर्जनम्"(१/२/४३) इति एकं "एकविभक्ति चापूर्वनिपाते" (१/२/४४) इति चापरं सूत्रम्। संज्ञा एका एव परन्तु सूत्रभेदेन फलभेदो दृश्यते। प्रथमसूत्रेण विधीयमानायाः उपसर्जनसंज्ञायाः फलं पूर्वनिपातः, द्वितीयसूत्रेण च विधीयमानायाः फलं ह्रस्वविधानम्। प्रथमम् उपसर्जनं लौकिकं शास्त्रीयम् इत्युभयरूपम्। अतः तद्विषये विविधप्रश्नामां समाधानपुरस्सरम् अत्र पत्रे विचारः प्रस्तूयते।

## सूत्रार्थः

त्रिपदात्मकं सूत्रमिदम्। प्रथमानिर्दिष्टम्, समासे, उपसर्जनमिति पदच्छेदः। समासे प्रथमानिर्दिष्टम्

उपसर्जनं भवति इति सूत्रगतपदान्वयः। प्रथमया निर्दिष्टं प्रथमानिर्दिष्टम्। तेन च समासे प्रथमया विभक्त्या यत् निर्दिश्यते तत् उपसर्जनसंज्ञं भवति इति सूत्रार्थः सम्पद्यते। ननु समासे इत्यस्य समासे सति इत्यर्थस्वीकारे हि असम्भवदोष आपद्यते। तथाहि एवमर्थस्वीकारे समासे सति प्रथमान्तपदेन निर्दिष्टम् उपसर्जनसंज्ञं भवति इति सूत्रार्थः सम्पद्यते। तथा चेत् समासे सम्पन्ने समासां विभक्तीनां लुकि प्रथमान्तं पदमेव खलु न प्राप्यते इति असम्भवदोषः। यदि समासे इत्यस्य समासे चिकीर्षिते इत्यर्थः अस्तु, तेन अलौकिकविग्रहवाक्ये विद्यमानस्य प्रथमानिर्दिष्टस्य उपसर्जनसंज्ञा भवतीति चेन्न। तदा कष्टश्रित इत्यस्य अलौकिकविग्रहवाक्ये कष्ट अम् श्रित सु इत्यादौ प्रथमानिर्दिष्टस्य श्रित सु इत्यस्य उपसर्जनसंज्ञापत्तिः, तथा च तस्य "उपसर्जनं पूर्वम्"(२/२/३०) इति तस्य पूर्वनिपातापत्तिः, यच्च अनिष्टम्। अत एव भट्टोजिदीक्षितः स्ववृत्तौ समासे इत्यस्य अर्थमाह 'समासशास्त्रे' इति। समासशास्त्रे इत्यस्य समासघटितशास्त्रे इति नार्थः। तथा चेत् "समासेऽङ्गुलेः सङ्गः" (८/३/८०) इति सूत्रस्यापि समासपदघटितत्वात् तत्र च सङ्गपदस्य प्रथमानिर्दिष्टत्वात् तस्यापि उपसर्जनसंज्ञापत्तिः। अत एव आह काशिकाकारः - 'समासे इति समासविधायि शास्त्रं गृह्यते'[1] इति। शास्त्रं च इह सूत्रं गृह्यते। तेन सूत्रस्यास्य अर्थः सम्भवति समासविधायकसूत्रे यत् प्रथमान्तनिर्दिष्टं पदं भवति तत् उपसर्जनसंज्ञं भवति इति।

**संज्ञाफलम्**

अस्या उपसर्जनसंज्ञायाः फलं तावत् "उपसर्जनं पूर्वम्" (२/२/३०) इति। तथाहि यस्य पदस्य उपसर्जनसंज्ञा भवति तस्य पूर्वं प्रयोगो भवति। अत एव वृत्तौ उक्तं भट्टोजिदीक्षितेन - समासे उपसर्जनं प्राक् प्रयोज्यम् इति। कृष्णश्रित इत्युदाहरणम्। तथाहि कृष्णं श्रितः इत्यत्र समासे समासविधायकं सूत्रं भवति - "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" (२/२/२४) इति। अस्मिन् च सूत्रे द्वितीया इत्यत्र प्रथमाविभक्तिर्दृश्यते। द्वितीया इत्यस्य च तदन्तविधिना द्वितीयान्तमित्यर्थः। तेन च सूत्रस्थप्रथमान्तपदेन निर्दिष्टं भवति विग्रहवाक्यस्थं द्वितीयान्तं कृष्णम् इति पदम्। प्रकृतसूत्रेण च तस्यैव कृष्णम् इति पदस्य उपसर्जनसंज्ञा भवति। तस्य पूर्वनिपाते कृष्णश्रित इति रूपं सिध्यति। एवं तृतीयासमासे तृतीयेति, चतुर्थीसमासे चतुर्थीति, पञ्चमीसमासे पञ्चमीति, षष्ठीसमासे षष्ठीति, सप्तमीसमासे सप्तमीति पदेषु प्रथमादर्शनात् तत्तन्निर्दिष्टविग्रहवाक्यस्थितपदानाम् उपसर्जनसंज्ञा सिध्यति। एवं शङ्कुलाखण्डः, यूपदारु, चोरभयम्, राजपुरुषः, अक्षशौण्डः इत्यादौ अपि तत्तत्सूत्रस्थप्रथमानिर्दिष्टानां तृतीयान्तादीनां पदानां पूर्वप्रयोगः बोध्यः। एतद्धि फलं प्रकृतसूत्रेण विधीयमानायाः उपसर्जनसंज्ञायाः।

**महासंज्ञात्वेन विचारः**

अत्राक्षेपः भवति- समासविधायकशास्त्रे प्रथमानिर्दिष्टस्य उपसर्जनसंज्ञास्वीकारे राजकुमारीश्रितः इत्यत्र दोषः आपतति। तथाहि राज्ञः कुमारीं श्रितः इत्यत्र परिनिष्ठितविभक्त्या समासपक्षे कुमारीमित्यस्य द्वितीयान्तत्वात् "द्वितीया श्रितातीत..." इति सूत्रे च द्वितीया इत्यत्र प्रथमादर्शनात् तस्य प्रकृतसूत्रेण उपसर्जनसंज्ञा प्राप्नोति, समश्च राज्ञः इत्यस्य षष्ठ्यन्तत्वात् "षष्ठी" (२/२/८) इति सूत्रे च षष्ठी इत्यत्र प्रथमादर्शनात् तस्यापि उपसर्जनसंज्ञा प्राप्नोति। तथा च उभयोरपि पूर्वनिपातापत्तिः। राज्ञ इत्यस्य तु पूर्वनिपात इष्टः, किन्तु कुमारीमित्यस्य तन्नेष्टम् इति तस्यापि पूर्वनिपातप्रसङ्गः इति।

अस्य समाधानमुच्यते- उपसर्जनमिति महासंज्ञा कृता यथा अन्वर्थसंज्ञा विज्ञायेत। अन्वर्थत्वं च अस्य उपसृजति उपश्लिष्यति विशेष्यमिति उपसर्जनमिति। 'अप्रधानमुपसर्जनम्'[2] इति यावत्। तेन इदानीं सूत्रस्यास्य अर्थः सम्पद्यते समासविधायकशास्त्रे प्रथमान्तं यत् पदं तेन निर्दिष्टम् अप्रधानम् उपसर्जनं भवति इति। अप्रधानमिति सम्बन्धिशब्दः तेन कस्यापेक्षया अप्रधानमिति

[1] काशिका, पृ. 290

[2] व्याकरणमहाभाष्यम्, पृ. 39

विवक्षया 'यं प्रति यद्प्रधानं तं प्रति तदुपसर्जनसंज्ञं भवतीति'[3] लभ्यते। तेन राज्ञः कुमारीं श्रित इत्यत्र कुमारीम् इति श्रित इति पदं प्रति अप्रधानम् अपि राज्ञ इति पदं प्रति तस्य न अप्रधानता इति राज्ञ इति पदं प्रति तस्य उपसर्जनत्वाभावः। तथा च कुमारीम् इति पदस्य उपसर्जनत्वाभावात् न पूर्वनिपातापत्तिरूपः दोषः।

पुनः प्रश्नः- समासविधायकशास्त्रे प्रथमानिर्दिष्टम् अप्रधानम् उपसर्जनं भवति इत्यर्थस्वीकारे पूर्वकायादीनाम् असिद्धिः। तथाहि पूर्वं कायस्य इति विग्रहवाक्यम्। अत्र समासविधायकं सूत्रं भवति "पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे" (२/२/१) इति। अस्मिन् च सूत्रे पूर्वापराधरोत्तरम् इत्यस्य प्रथमान्तत्वेन तन्निर्दिष्टं सद् अपि पूर्वम् इति उपसर्जनं न भवति, कायस्य इति पदं प्रति तस्य अप्रधानत्वाभावात्। तेन पूर्वनिपातानापत्तिः इति।

तस्य समाधानं वदति नागेशः- 'समासशास्त्रस्थप्रथमानिर्दिष्टशब्दगताप्राधान्यस्य आश्रयणेन अदोषात्'[4] इति। तथाहि समाससंज्ञाविधायकशास्त्रस्थं यत् अप्रधानं प्रथमान्तं पदं तन्निर्दिष्टो यः अलौकिकविग्रहवाक्यस्थः शब्दः तस्य उपसर्जनसंज्ञा भवति इति सूत्रार्थः क्रियते। तेन अत्र पूर्वापराधर… इत्यादि सूत्रे प्रथमानिर्दिष्टस्य पूर्वशब्दस्यैव उपसर्ज्ञनसंज्ञेति न दोषः इति।

ननु एवमपि "द्वितीया श्रितातीत…" इत्यादिसूत्रेषु द्वितीयादिपदेषु प्रथमान्तत्वं स्पष्टं, परन्तु "सहयुक्तेऽप्रधाने"(२/३/१९) इति सूत्रबलात् सहयुक्तस्यैव अप्रधानत्वात् इह च द्वितीयादिपदेषु सहयोगाभावात् नहि तस्य अप्रधानत्वं लभ्यते। यच्च सहयुक्तम् अप्रधानं पदं श्रितादि तन्न प्रथमान्तमिति क्वापि समासशास्त्रस्थम् अप्रधानं प्रथमान्तं पदं न लभ्यते इति नागेशाशयः अस्पष्ट इति आशङ्का समुत्पद्यते। तत्र उच्यते- 'सहयुक्ततृतीयान्तार्थस्य शब्दगुणान्वयत्वाभावरूपाप्राधान्ये अपि तत्समभिव्याहृतप्रथमाद्यन्तार्थे तदधीनत्वरूपाप्राधान्यप्रतीतेः'[5] इति। तथाहि येन सह शाब्दान्वयः तस्य प्राधान्यादेव तदनुसारेणैव क्रिया-गुण-द्रव्यवाचकशब्देषु लिङ्गवचनादीनि परिवर्तन्ते। तथा च शाब्दान्वयाभावात् तृतीयान्तार्थस्य अप्राधान्ये अपि लोके यत् तृतीयान्तार्थेन सह प्रयुक्ते प्रथमाद्यन्तार्थे तदधीनत्वरूपाप्राधान्यं प्रतीतं भवति तदेव इह अप्रधानरूपेण गृह्यते। अर्थात् यथा समकक्षयोः अपि देवदत्तयज्ञदत्तयोः राज्ञा देवदत्तेन सह यज्ञदत्तः सभां गच्छेत् इत्थमादिष्टं चेत् यज्ञदत्तस्य मनसि क्षोभो जायते देवदत्ताधीनत्वात् तस्य। इत्थम् अत्रापि समासविधायकसूत्रेषु तृतीयान्तार्थाधीनत्वरूपम् अप्राधान्यं ग्राह्यम्। तेन "द्वितीया श्रितातीत…" इत्यादिसूत्रेषु श्रितादि-तृतीयान्तार्थाधीनत्वरूपम् प्रथमान्तद्वितीयादिपदगतम् अप्राधान्यम् अश्रीयते। तथा च न कापि हानिः। तथाहि द्वितीया इत्यस्य अप्रधानत्वात् प्रथमान्तत्वात् च तन्निर्दिष्टस्य कृष्णमित्यस्य उपसर्जनसंज्ञा सुलभा।

एवमेव पूर्वं कायस्य इत्यत्र "पूर्वापराधरोत्तरम्…" इति सूत्रेण समासो भवति। अत्र च पूर्वादिपदे प्रथमान्तत्वम्, किञ्च एकदेशिपदाधीनत्वरूपम् अप्राधान्यं सुलभं भवति। तथा च प्रथमानिर्दिष्टस्य पूर्वम् इति पदस्य उपसर्जनसंज्ञायां न कापि आपत्तिः इति समासशास्त्रे यः अप्रधानभूतः प्रथमान्तशब्दः, तेन निर्दिष्टं यत् पदं विग्रहवाक्ये, तस्यैव उपसर्जनसंज्ञा भवति इति सूत्रार्थः पर्यवस्यति।

**पदमञ्जरीमतखण्डनम्**

उपसर्जनसंज्ञायाः अन्वर्थत्वस्वीकारे पूर्वकायादिषु या समस्या समुद्भुता तस्याः समाधानं पदमञ्जर्यादिषु एवं दृश्यते यत् 'अन्वर्थत्वं तु सति सम्भवे व्यवस्थापकम्'[6] इति। तथाहि अन्वर्थसंज्ञा तत्रैव यत्र सः अर्थः सम्भवति, यत्र तु सः अर्थो न सम्भवति तत्र अन्वर्थत्वं न प्रवर्तते। यथा कर्मप्रवचनीयसंज्ञा अन्वर्थसंज्ञा इत्युच्यते क्रियां कर्म प्रोक्तवान् इति तदर्थात्। परन्तु "सुः पूजायाम्" (१/४/९४) इत्यादिस्थलेषु स्वादीनां क्रियावाचकत्वाभावे अपि विधानसामर्थ्यात् सुसिक्तमित्यादौ

[3] व्याकरणमहाभाष्यम्, पृ. 39

[4] लघुशब्देन्दुशेखरः, पृ. 390

[5] लघुशब्देन्दुशेखरः, पृ. 391

[6] काशिकावृत्तिः, पदमञ्जरी, पृ. 292

कर्मप्रवचनीयत्वं सुसिद्धं भवति। इत्थं पूर्वकायादिस्थलेषु अपि सति सम्भवे उपसर्जनसंज्ञायाः अन्वर्थत्वस्वीकारे पूर्वादिपदेषु प्रथमाविधानसामर्थ्यात् उपसर्जनसंज्ञा निर्बाधं भवति इति न दोषः। परं नागेश एतत् न मनुते। तन्नये हि पूर्वापराधरोत्तरम् इत्यादिस्थलेषु प्रथमानिर्देशात् उपसर्जनसंज्ञा सेत्स्यति इति न। यतः तत्र प्रथमाविभक्तिः पदसाधुत्वकरणाय वर्तते न तु उपसर्जनसंज्ञार्थम्। प्रथमाविभक्तेरभावात् निर्विभक्तिकं तत् स्यात्, तादृशस्य च निर्विभक्तिकस्य उच्चारणानौचित्यात् प्रथमा आवश्यकी एव। किञ्च द्वितीयादिविभक्तयः कथं न उपात्ता इत्यपि न शङ्कनीयं साधुत्वसाधनाय प्रथमातिक्रमणे मानाभावात् प्रथमाया एव औचित्यात्। किञ्च पूर्वादयः समस्यन्ते इत्यत्र प्रथमा एव अन्वेति इति अन्वितविभक्तिं परित्यज्य अनन्वितविभक्तिपरिकल्पने अपि मानाभावः। किञ्च प्रथमाविभक्तौ लघुत्वमपि अस्ति। तथाहि प्रातिपदिकार्थमात्रापेक्षया प्रथमाविभक्तिर्भवति, अन्यासां विभक्तीनां तु प्रातिपदिकार्थेन सह कर्मादीनाम् अतिरिक्तानाम् अपेक्षा विद्यते इति प्रथमोच्चारणे लाघवमपि दृश्यते। इत्थं पूर्वादिपदेषु प्रथमाविभक्तिसामर्थ्यात् तेषाम् अप्रधानत्वे अपि उपसर्जनसंज्ञा सेत्स्यति इति मतं निराकृतं नागेशेन।

## उपसंहार

इत्थं प्रथमसूत्रेण विधीयमानायाः उपसर्जनसंज्ञायाः फलं पूर्वनिपातः, उपसर्जनं लौकिकं शास्त्रीयम् इत्युभयरूपम्, तत्र ये आक्षेपाः तेषां समाधानञ्च समासेन यथामति समुपन्यस्तम् इति शिवम्।

## परिशीलितग्रन्थसूची


1. नागेशभट्टः। लघुशब्देन्दुशेखरः [तृतीयखण्डम्]। तिवारी, नारायणः (ज्योत्स्नाटीकाकारः)। वाराणसी: चौखम्बा-संस्कृत-भवन। 2015
2. पतञ्जलिः। व्याकरणमहाभाष्यम् [द्वितीयखण्डम्]। शर्मा, शिवदत्तः (सम्पा.)। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान। 2014
3. भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी [द्वितीयखण्डम्]। शर्मा, गिरिधरः (सम्पा.)। दिल्ली: मोतीलाल बनारसीदास। 2010
4. वामनजयादित्यौ। काशिका [प्रथमो भागः]। त्रिपाठी, जयशङ्करलालः; मालवीयः, सुधाकरः (सम्पा.)। वाराणसी : तारा प्रिंटिंग वर्क्स। 1985